ज्ञानधर्मभेदे तच्च न्यायमते परतोग्राह्यं मीमांसकादिमते स्वतः, स्वमानमपूर्वा वा ग्राह्यमिति भेदः । प्रमात्वशब्दे दृश्यम् । [इच्चे शब्दच०। भावे ष्यञ् । २प्रमादे न०।

**प्रामाद्य** पु० प्रमाद्यत्यनेन प्र+मद बा० करणे ष्यञ् । १वासक-

**प्रामीत्य** न० प्र+मी—भावे क्तिन् तत्र साधु ष्यञ् । १ऋणे त्रिका०पाठान्तरम् । प्रमीतस्य भावः ष्यञ् । २मरणे न० ।

**प्राय** पु० प्र+अय—इण्—वा घञ्—अच् वा । १मृत्यौ २अनशनमृत्यौ ३बाहुल्ये च मेदि० "प्रायेण सामग्र्यविधौ गुणानाम्" कुमारः । ततः प्रकृत्यादि० सर्वविभक्त्यपवादस्तृतीया प्रायेण गार्ग्यः सि०कौ० ।

**प्रायण** न०प्र+अय-भावे ल्युट् । १देहत्यागेन स्थानान्तरगमने मनुः ८।२२२ श्लो० उदा० । २प्रारम्भे च "सैषा त्रिवृत्प्रायणा" ताण्ड्य०ब्रा० २।१५।२ "त्रिवृत् स्तुतत्वकः प्रायणे प्रारम्भे यस्याः" भा० ।

**प्रायणीय** त्रि० प्रायणं आरम्भदिनं तत्र विहितः छ । १प्रारम्भदिने २गवामयनप्रथमाहादौ च विहिते अतिरात्रे यागभेदे च "प्रायणीयेऽद्य सुत्यामेके" कात्या० श्रौ० १२।६।२६ 'प्रायणीयोऽतिरात्र एवाह साध्यः" देवनाथः । ताण्ड्य० ब्रा०४।२।१।२ भाष्ये द्वितीयाहस्यैव प्रायणीयसंज्ञा तन्निरुक्तिश्च दर्शिता यथा "प्रायणीयमेतदहर्भवति" मू०। "एतद्गव्यमानमहः प्रायणीयं प्रकर्षेण यान्ति गच्छन्ति स्वर्गमनेनेति व्युत्पत्तेः । एतत्संज्ञं गवामयनस्य द्वितीयमहरनुष्ठेयं भवति । यद्यपि श्रुत्यन्तरे प्रथमविहितस्यातिरात्रस्यैव प्रायणीय इति संज्ञा प्रसिद्धा तथापि प्रथमोत्तमयोरतिरात्रयोः सर्वत्र साधारणत्वादस्यैवाह्नो गवामयने असाधारणं प्रायस्यमिति कृत्वा एतद्वादिकं गवायनस्वरूपमित्यस्मिन् द्वितीयेऽहनि प्रायणीयशब्दोऽत्र प्रयुज्यते । उक्तमहर्नामनिर्वचनद्वारा प्रशंसति" भा० "प्रायणीयेन वा अह्ना देवाः स्वर्गं लोकं प्रायन् यत् प्रायंस्तत् प्रायणीयस्य प्रायणीयत्वम्" मू० "पुरा देवाः प्रायणीयेन प्रायणीयाख्येन खल्वह्ना स्वर्गं लोकं प्रायन् प्राप्ताः यद्यस्मात् प्रायन् स्वर्गं प्रागमन् तस्मादस्याह्नः प्रायणीयत्वं प्रायणीयसाधारणत्वात् प्रायणीयमिति नाम सम्पन्नम्" भा०। तदहः कर्त्तव्यत्वादतिरात्रस्य प्रायणीयसंज्ञेति बोध्यम् ।

**प्रायश्चित्त** न० पापक्षयमात्रसाधनत्वेन विधिबोधिते कर्मभेदे यथोक्तं प्रा०वि०

तत्राङ्गिराः "प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते । तपो निश्चयसंयुक्तं प्रायश्चित्तमिति स्मृतम् । निश्चयसंयुक्तं पापक्षयसाधनत्वेन निश्चितमित्यर्थः । तथा हारीतः "प्रयतत्वाद्वोपचितमशुभं नाशयतीति प्रायश्चित्तम्" । एतेन पापक्षयमात्रसाधनं कर्म प्रायश्चित्तमिति तल्लक्षणम् । मात्रशब्दात् तुलापुरुषाश्वमेधादिव्यावृत्तिः । तत्र पापविशेषस्यैव कामाकामकृतस्य शक्तिविशेषस्य ततो नाशः मतभेदेन अव्यवहार्य्यशब्दे ४७०,७१दर्शितः । "प्रायश्चित्तैरपैत्येनो यदज्ञानं कृतं भवेत् । कामतो व्यवहार्य्यस्तु वचनादिह जायते" याज्ञ० वचनस्य प्रा०वि० व्याख्यानं मतभेदेन दर्शितं यथा

"कामत इति अज्ञानकृतपापप्रायश्चित्तेन कामकृतपापापगमो न भवति । किन्तु व्यवहार्य्यतामात्रम् । ननु सति पापे कथं व्यवहार्य्यतामात्रम् अत आह वचनादिति । अयमभिप्रायः अर्द्धप्रायश्चित्तानुष्ठानेनार्द्धपापक्षयात् सम्भाषणस्पर्शनदर्शनादिलघुव्यवहारो न दुष्टः न तु भोजनपरिणयनव्यवहारोऽपि वचनादेव यथा कुनखित्वादिसूचितमहापापशेषसद्भावे व्यवहार्य्यतेति । अथ वा अकारप्रश्लेषाद्यथोक्तेन प्रायश्चित्तेन कामतोऽपि पापक्षयो भवत्येव किन्त्वव्यवहार्य्यः पापाभावेऽपि वचनात् । अत एव मनुः "बालघ्नांश्च कृतघ्नांश्च विशुद्धानपि धर्मतः । शरणागतहन्तॄंश्च स्त्रीहन्तॄंश्च न संवसेत्" । याज्ञवल्क्यः "शरणागतबालस्त्रीहिंसकान् संवसेन्न तु । चीर्णव्रतानपि सदा कृतघ्नसहितानिमान् । कृतनिर्णेजनांश्चैव न जुगुप्सेत कर्हिचित्" इति मनुवचनं त्वज्ञानकृतमहापापे बोद्धव्यमिति । भवदेवस्तु सर्वत्र "व्रतः शुद्धिमवाप्नुयादिति" दर्शनादत्राव्यवहार्य्यतावचनं निन्दार्थमित्याह । विज्ञानस्तु पापकर्मणा हि द्वयं जन्यते शरीरगतमप्रायत्यमात्मगतञ्च पापं तत्र स्पर्शादौ वैदिककर्मणि चानर्हत्वलक्षणं तेनात्र कामनाकृते केवलशरीरदोषः प्रायश्चित्तेनापनीयते जन्मान्तरकृतदुरितस्येवात्मनः शरीरान्तरस्य व्यवहाराधिकारित्वम् आत्मगतञ्च पापं भोगादेव क्षीयते" तच्च कामकारकृतेऽप्याङ्गिरेके श्रुतिनिदर्शनात् इति मनुवचनादुक्तश्रुतिविरोधाच्च" । मिताक्षरामतन्तु अवहार्य्यशब्दे दर्शितम् । प्रायश्चित्तस्य काम्यत्वं नैमित्तिकत्वं नित्यत्वञ्च यथाह

जाबालः "काम्यानां सफलार्थञ्च दोषघातार्थमेव च । अतः काम्यं नैमित्तिकञ्च प्रायश्चित्तमिति स्थितिः । चरितव्यमतो नित्यं प्रायश्चित्तं विशुद्धये । निन्द्यैश्च लक्षणैर्युक्ता जायन्तेऽनिष्कृतैनसः" । ज्ञानाज्ञानकृत-